श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीव्योमपुरीनाथस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीव्योमपुरीनाथस्तुतिः ॥

श्रीमद्वेङ्कटशेषार्यपदपङ्कजषट्पदः।
श्रीमद्व्योमपुरीनाथस्तुतिझङ्कारमाददे॥ १॥

आकाशनगरीनाथमाश्रये श्रितवत्सलम्।
राकाशशाङ्कवदना महिषी यस्य मेदिनी॥ २॥

मघवद्विमानमधिरुह्य मानिधिः
सकलार्थदस्सकललोकसंस्तुतः।
शुभगन्धरम्यसुमदाममण्डितः
धरणीसमेत इह राजते हरिः॥ ३॥

योऽलङ्करोति नरवाहनमध्यभागं
वीथीञ्च लोकनयनं च रमानिवासः।
सोऽलं शिवाय शिववारिजजातवन्द्यः
त्वं संशृणुष्व हृदयानय साधुभावम्॥ ४॥

वेङ्कटार्यगुरुमण्डपस्थितो
वेङ्कटेश्वरहरिर्मनोहरः।
तोषितो द्रमिडवेदसूक्तिभिः
भूषितो जयति हारपङ्क्तिभिः॥ ५॥

ओषधीशप्रभावाहमध्यगस्सूनभूषितः।
निष्कलङ्कं यशो धत्ते सुवंशकरपङ्कजः॥ ६॥

अष्टाक्षरमहामन्त्रध्यातृणामिह गोचरः।
आदिशेषोपरि स्थायी शेषी विशति मे मनः॥ ७॥

विद्रावितनिद्रा इह रुद्रापतिवाहे
मर्त्यास्तव कीर्त्या हितकर्त्र्या हृतचित्ताः।

www.prapatti.com

नत्वाप्यथ मत्वा गजसत्त्वाभिरतं त्वां
    हृष्टाः स्तवनष्टाखिलकष्टा विलसन्ति॥ ८॥

गारुडं वपुरारुढं चारुडम्बरमम्बरे।
शम्बरारिप्रसोतारं तं परं पर्युपास्महे॥ ९॥

हंसवाहनमारूढा कंसजित्प्राणनायिका।
शंसतीव हि भव्यानि दर्शनीयशुभाकृतिः॥ १०॥

सूर्यात्मजकार्यातुरधैर्यामलभूर्यो
    वार्यात्मजवर्याहृतभार्याननदृष्टिः।
कार्यात्मजधार्याकृतिरार्यानतपादः
    श्रीमानिधिनामा स हि मारुत्युपरिष्ठः॥ ११॥

अपामपत्येषु रमानिधिं या
    चकार वश्यं जनतेष्टसिद्ध्यै।
सा तेषु तच्छ्रेष्ठतमेति सन्तः
    त्वामब्जशीर्षे कलयन्ति किं नु॥ १२॥

रजतगजवाहनस्थां
    भजत धरित्रीं रमाधराश्लिष्टाम्।
अजमुखदैवतवन्द्यां
    विजहत भवरोगचिन्तया पीडाम्॥ १३॥

मतङ्गजशुभावहं नमत तं गजेन्द्रोपरि
    स्थितं वितमसि स्पृहा विगलिता पदे सा यया।
नतप्रतिभटे सदा रचितसाध्वसे ध्यातया
    हताहितसमूहया ह्यचलयाऽदृतप्रान्तया॥ १४॥

क्षमोरुसम्पृक्चरणाभिराममम्
    अनेकमृद्वास्तरणे शयानम्।
स्तब्धं जनानामिव दर्शनाच्च
    सुखेन तं नौमि रमानिवासम्॥ १५॥



www.prapatti.com

आदर्शपङ्क्तिष्वतिदर्शनीय-
वपुःश्रियं तं क्षमया समेतम्।
को मारकोटिं कलयेत नान्तः
दृष्ट्वा जितां तेन यथार्थनाम्नीम्॥ १६ ॥

अतिप्रसन्नं कुरुते मह-
स्तन्महे मदीयं हृदयं विधेयम्।
धराभिरामान्तिकदर्शनीयं
भूषाविशेषोज्ज्वलशोभनाङ्गम्॥ १७ ॥

भुवनजननी पुंसां श्रेष्ठं पुराणममुं पतिं
निजसविधगं स्पृष्ट्वा मोहान्निमीलितलोचनम्।
सुकुलतनयावस्थाऽऽसीना प्रदर्श्य निजं जनं
परमसुलभं सर्वावस्थास्वियं वदतीव तम्॥ १८ ॥

तल्पे मृदुत्वे भुजगेन्द्रकल्पे
स्वल्पेतरौजोमणिक्लृप्तपार्श्वे।
शयानमम्भोरुहदम्भहारि-
विलोचनं लोचन! नो जहीहि॥ १९ ॥

नमांसि भूयांसि मनो मदीयं
करोति तस्मै धरणीधवाय।
अपायदूराय मनोहराय
ममापराधौघविनाशनाय॥ २० ॥

भूमीसमेताय सतां हिताय
नतावनायादृतवैभवाय।
कस्मैचिदस्मै करुणाकराय
नमोऽभिधायास्ति मनो मदीयम्॥ २१ ॥

अशेषविद्वत्परिषन्निषेव्यः
ममैष भव्याय विशेषभूषः।

शेषाहिपर्यङ्कनिषेवितोऽपि
स्वामी पुरो भाति रमानिवासः॥ २२॥

आन्दोलिकान्तरवनीरमणं युवानम्
आलिङ्ग्य साधु धिषणे! समयं च सायम्।
दृष्ट्वा रतिं कलयितुं धृतकौतुका त्वं
तन्नो जहासि कृतचुम्बनतत्तदङ्गा॥ २३॥

पार्श्वे क्षमा भगवतीति विचिन्त्य सम्यक्
भीतिं न याहि धिषणे! सुरतानुभोगे।
अस्मादिहान्यविषया ननु भोक्तुकामा
सापि त्वमेहि मम सद्वचनं शृणु त्वम्॥ २४॥

नवनीततस्कर! कुरुष्व मन्मन-
स्यनवीनवाग्विवृतवैभव! प्रभो!।
भवनस्पृहामभव! ते कृपावशात्
भवनाशनं भवति देहिनामिह॥ २५॥

भूम्याः पतिममुं देवमाकाशनगरस्य च।
विभावयन्तो विनताः विन्यस्यन्ति वहन्ति च॥ २६॥

वियत्पुर्या नाथं प्रणमति जनः केवलमयं
विशब्दो वै भूयादिति मनसि यात्र स्थितिमती।
गता शङ्का सा मे हयवरमधःकृत्य भगव-
त्स्थितिं दृष्ट्वाऽऽश्वास्य स्तुतिचरमपद्यस्मृतिमतेः॥ २७॥

अक्षमा सुकुमाराङ्गी याऽऽसञ्चारेऽपि सा त्वया।
हयानुसरणव्यग्रा स्फुटमुक्ता क्षमेति हि॥ २८॥

श्रीमद्वियन्नगरनाथ! रथाधिरूढ!
चण्डालपार्श्वगमनादिजदोषघोषम्।
तस्मिन् दिनेऽन्त्यजकरप्रहृतोद्भवैस्त्वं
घोषैर्विषादयसि मेऽघमपि क्षमस्व॥ २९॥

तीर्थ ! तीर्थप्रसादेन तीर्थदर्शन ! पावयन्।
जनान् स्थितो भवान् भूयात् भव्याय मम मानिधे !॥ ३० ॥

श्रीमत्फाल्गुनमासि श्रीनिधिदिव्योत्सवाप्तमदमत्तः।
श्रीनिधिराघवदासश्श्रीकरमेतच्चकार सच्छ्लोकैः॥ ३१ ॥

श्रीमद्वेङ्कटशेषवर्यगुरुराड्वादाम्बुपानागत-
ब्राह्मीनर्तनरङ्गभूतरसनाजाग्रत्तुरङ्गाननः।
कश्चिन्मानिधिराघवाभिधकविः काव्यार्थवित्सम्मतः
श्रीमद्भागवताङ्घ्रिचिन्तनपरश्चक्रे स्तवं मानिधेः॥ ३२ ॥

॥ इति श्रीव्योमपुरीनाथस्तुतिः समाप्तः ॥

www.prapatti.com